BAGNAN COLLEGE ESTD 1954 Bagnan, Howrah

B(3rd Sm.)-Sanskrit-H/DSCC-3/CCF

# 2024

## SANSKRIT — HONOURS

**Paper : DSCC-3**

**[Classical Sanskrit Literature (Prose and Poetry)]**

**Full Marks : 75**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**Unit - I**

**(Marks : 25)**

1. अधोलिखितयोः कस्य***चिदेकस्यो***त्तरं लेख्यम्। 10×1

   (a) "तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः। दिलीप इति राजेन्दुः"— अत्र तच्छब्देन कस्योल्लेखः विहितः? अत्रोल्लिखितस्य राज्ञः गुणाः यथापाठ्यं विव्रियन्ताम्।

   (b) "उपमा कालिदासस्य"— इत्युक्तेः याथार्थ्यं पाठ्यांशानुरोधेन विचार्यताम्।

2. अधोलिखितयोः श्लोकयोः यथेच्छ***मेकस्य*** सप्रसङ्गं व्याख्या संस्कृतभाषया देवनागरलिप्या च कार्या। 7×1

   (a) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
   तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

   (b) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।
   हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥

3. अधोलिखितयोः श्लोकयोः यथेच्छ***मेकस्य*** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×1

   (a) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
   जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

   (b) तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।
   विलम्बितफलैः कालं स निनाय मनोरथैः॥

4. (a) कस्य***चिदेकस्य*** सन्धिविच्छेदः करणीयः। 1×1

   (i) वागर्थाविव 3(a) प्रश्ने।

   (ii) मोहादुडुपेनास्मि 2(a) प्रश्ने।

BAGNAN COLLEGE ESTD 1954 Bagnan, Howrah

BAGNAN COLLEGE ESTD 1958 Bagnan, Howrah

(b) कस्य***चिदेकस्य*** व्युत्पत्तिः निर्णेया। 1×1

(i) तितीर्षुः 2(a) प्रश्ने।

(ii) संलक्ष्यते 2(b) प्रश्ने।

(c) कस्य***चिदेकस्य*** विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 1×1

(i) वागर्थप्रतिपत्तये 3(a) प्रश्ने।

(ii) सूर्यप्रभवः 2(a) प्रश्ने।

## Unit - II

### (Marks : 25)

5. अधोलिखितयोः कस्य***चिदेकस्यो***त्तरं लेख्यम्। 10×1

(a) किरातार्जुनीय-महाकाव्यस्य प्रथमसर्गे युधिष्ठिराय वनेचरेण निवेदितानि वचनानि यथापाठ्यं विव्रियन्ताम्।

(b) "भारवेरर्थगौरवम्"— इत्युक्तेः याथार्थ्यं पाठ्यांशानुसारेण विचार्यताम्।

6. अधोलिखितयोः श्लोकयोः कस्य***चिदेकस्य*** सप्रसङ्गं व्याख्या संस्कृतभाषया देवनागरलिप्या च कार्या। 7×1

(a) क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः॥

(b) भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः॥

7. अधोलिखितयोः श्लोकयोः कस्य***चिदेकस्य*** वङ्गभाषया आङ्गलभाषया वा अनुवादः विधेयः। 5×1

(a) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः॥

(b) कथाप्रसङ्गेन जनैरुदाहृता-
-दनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः
सुदुःसहान्मन्त्रपदादिवोरगः॥

8. (a) कस्यचिदेकस्य सन्धिविच्छेदः करणीयः। 1×1

(i) सुदुःसहान्मन्त्रपदादिवोरगः 7(b) प्रश्ने।

(ii) भवत्यधिक्षेपः 6(b) प्रश्ने।

(b) कस्यचिदेकस्य विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 1×1

(i) कृतप्रणामस्य 7(a) प्रश्ने।

(ii) निरस्तनारीसमया 6(b) प्रश्ने।

(c) कस्यचिदेकस्य व्युत्पत्तिः निर्णेया। 1×1

(i) विव्यथे 7(a) प्रश्ने।

(ii) व्यवसाययन्ति 6(b) प्रश्ने।

## Unit - III

**(Marks : 25)**

9. अधोलिखितयोः कस्यचिदेकस्य उत्तरं लेख्यम्। 10×1

(a) 'शुकनासोपदेशः' इति पाठ्यांशानुसारेण शुकनासेन चन्द्रापीड़ाय प्रदत्ता उपदेशाः सारतः विव्रियन्ताम्।

(b) "बाणोच्छिष्टं जगत् सर्वम्"— इत्युक्तेः याथार्थ्यं कादम्बरी-ग्रन्थस्य पाठ्यांशमनुसृत्य विचार्यताम्।

10. अधोलिखितयोः सन्दर्भयोः कस्यचिदेकस्य वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 5×1

(a) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः।

(b) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्, अनर्थकायासान्तरितविषयोपभोगसुख-मित्युपहसन्ति विद्वज्जनम्।

11. अधोलिखितेषु यथेच्छं पञ्चानामुत्तरं संक्षेपेण पूर्णवाक्येन च देयम्। 2×5

(a) "विरला हि तेषामुपदेष्टारः"– केषामुपदेष्टारः विरलाः कथं वा?

(b) "—दारुणो लक्ष्मीमदः"– अत्रोल्लिखितस्य लक्ष्मीमद-शब्दस्य कोऽर्थः? स कथं दारुणो भवति?

(c) शुकनासस्य मते का तावत् अनर्थपरम्परा?

(d) शुकनासस्य मते कदा केन च कारणेन पुरुषस्य स्वभावे भ्रम उत्पद्यते?

(e) "भवादृशा एव भवन्ति भाजनानि उपदेशानाम्–" अत्र "भवादृशाः" इति पदेन के बोधिताः? कथं ते उपदेशानां भाजनानि भवन्ति?

BAGNAN COLLEGE ESTD 1958 Bagnan Howrah

BAGNAN COLLEGE ESTD 1958 Bagnan, Howrah

(f) लक्ष्मीः कस्मात् उद्गता? उद्गमकाले सा कस्मात् चञ्चलतां गृहीत्वा आगता?

(g) "न क्वचिदपि निर्भरमाबध्नाति पदम्"– का क्वचिदपि कथं च पदं दृढ़ं नाबध्नाति?

(h) यौवनप्रभवं तमः कथमतिगहनं भवति?

---